**RAMAKRISHNA MISSION VIDYAMANDIRA**
**(Residential Autonomous College affiliated to University of Calcutta)**
**B.A./B.Sc. FIFTH SEMESTER EXAMINATION, MARCH 2021**
**THIRD YEAR [BATCH 2018-21]**
**SANSKRIT (HONOURS)**
**Paper : VI**

Date : 13/03/2021
Time : 11.00 am - 3.00 pm
Full Marks : 100

## Group - A

1. कश्चि**देकः** प्रश्नः समाधेयः। [1×10]

क) भूमिसुक्ते परिवेशभावनामधिकृत्य कश्चन प्रवन्ध विरच्यताम्।

ख) रुद्र शव्दस्य कीदृशं निर्वचनं भाष्यकारैः प्रदर्शितम्? शुक्लयजुःसंहितायां रुद्रस्य स्वरूपमधिकृत्य कश्चन नातिदीर्घः प्रवन्धः संस्कृतभाषया उपस्थाप्यताम्।

**अथवा**

वङ्गभाषया आङ्गलभाषया हिन्दीभाषया वा कस्यचिद् अनुच्छेद**द्वयस्य** अनुवादः करणीयः। [2×5]

क) यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति।
सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा।।

ख) यस्यां पूर्वे पूर्व-जना विचक्रिरे यस्या देवा असुरानभ्यवर्तयन्।
गवामश्वानां वयसश्च विष्टा भगं वर्चः पृथिवी नी दधातु।।

ग) शिवेन वचसा त्वा गिरिशाऽच्छावदामसि।
यथा नः सर्वमिज्जगदयक्ष्णं सुमना असत।।

घ) या ते रुद्र शिवा रयोराऽपापपकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि।।

2. कश्चि**देकः** प्रश्नः समाधेयः । [1×10]

क) “स एकया पृष्टो दशभिः प्रत्युवाच” – को जनः केन जनेन पृष्टः ? पृच्छाविषयःकः? किमासीदुत्तरम् ? (1+1+8)

ख) शुनःशेपोपाख्यानं कुत्र समुपलभ्यते ? तत्र वर्णिताः इन्द्रोपदेशाः संक्षेपेणोपस्थापनीयाः । (1+9)

**अथवा**

वङ्गभाषया आङ्गलभाषया हिन्दीभाषया वा कस्यचिद् अनुच्छेद**द्वयस्य** अनुवादः करणीयः। [2×5]

क) तस्य ह विश्वामित्रो होताऽऽसीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्माऽयास्य उद्गाता तस्मा उपाकृताय योक्तारं न विविदुः स होवाचाजीगर्तः सौयवसिर्मह्यमपरं शतं दत्ताहमेनं नियोक्ष्यामीति ।

ख) स ह तावत्तावदेवान्ववससर्प्प तदप्येतदुत्तरस्य गिरेर्मनोरवसर्प्पणमित्यौघो ह सर्व्वाः प्रजा निरुवाहाथेह मनुरेवैकः परिशिशिषे ।

ग) तस्य ह त्रयः पुत्रा आसुः शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति । तं होवाच ऋषेऽहं ते शतं ददाम्यहमेषामेकेनाऽत्मानं निष्क्रीणा इति ।

घ) तस्य ह दन्ताः पेदिरे तं होवाचापत्सत वा अस्य दन्ता यजस्व माऽनेनेति, स होवाच यदा वै पशोर्दन्ताः पुनर्जायन्तेऽथ स मेध्यो भवति दन्ता न्वस्य

पुनर्जायन्तामथ त्वा यजा इति ...

3. यथेच्छ**मेकः** प्रश्नः समाधेयः [1×10]

क) बृहदारण्यकोपनिषदि प्रतिपादित आत्मन उत्क्रान्त्युपायः समुपवर्ण्यताम्।

ख) बृहदारण्यकोपनिषदि वर्णिता आत्मतत्त्वसाक्षात्कारोपाया आलोचनीयाः।

4. यथेच्छं **द्वयोः** बङ्गभाषया आङ्गलभाषया वानुवादः करणीयः [2×6]

क) तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरति।

ख) तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य

प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्।

तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे।।

ग) यस्यानुवित्तः प्रतिबुद्ध आत्माऽ–

स्मिन् सन्देह्ये गहने प्रविष्टः।

स विश्वकृत् स हि सर्वस्य कर्ता

तस्य लोकः स उ लोक एव।।

घ) सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् स्यां न्वहं

तेनाऽमृताहो नेति, नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं

स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति।

5. यथामति **एकस्या** पङ्कतेः व्याख्या कार्या [1×8]

क) आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्।

ख) अमृतत्वस्य तु नाशास्ति वित्तेन।

## Group - B

कारकप्रकरणे प्रश्नाः

6. **एकः** प्रश्नः समाधेयः। [1×1

क) उपपदपञ्चमीमधिकृत्य लघुनिबन्धो लेख्यः।

ख) अधिप्रथमाकारकमालोचनं विधीयताम्।

7. सूत्र**द्वयं** व्याख्यातव्यम्। [2×7]

क) कर्तुरीप्सिततमं कर्म

ख) साधकतमं करणम्

ग) कर्तृकर्मणोः कृति

घ) वारणार्थानामीप्सितः

8. पङ्क्ति**द्वयं** व्याख्यायताम्। [2×4]

क) तमप्ग्रहणं किम् ? पयसा ओदनं भुङ्क्ते।

ख) इह उक्तार्थत्वाद् विभक्तेरप्राप्तौ वचनम्।

ग) क्वचिन्निपातेनाभिधानम्।

घ) विभाषा इति योगविभागाद् अगुणे स्त्रियां च क्वचित्। धूमादग्निमान्।

9. उपरिष्टात् प्रदत्तं प्रतीकमाश्रित्य टिप्पणी**द्वयं** देयम्। [2×3

क) प्रातिपदिकार्थः।

ख) शेषः।

ग) अधिकरणम्।

घ) अपादानम्।

10. सकारणं **पञ्चानां** विभक्तिनिर्णयः कार्यः। [5×2]

क) **पूतनाम्** स्वर्गमगमयत् हरिः।

ख) क्रमादमुं **नारद** इत्यबोधि सः।

ग) **शस्त्रेण** घात्या अरयः सदैव।

घ) याचते **धनिनं** धनं भिक्षुकः।

ङ) रामेण गमनं **वनस्य** विहितम्।

च) **भूतले** विन्दते वारि।

छ) **गुरोः** निलीयते छात्रः।

ज) मा कुरु **धनजनयौवनगर्वम्**।

———— × ————